श्री दुर्गाष्टकं

श्री दुर्गाष्टकं

कात्यायनि महामाये खड्गबाणधनुर्धरे |
खड्गधारिणि चंडि श्री दुर्गादेवि नमोऽस्तु ते || 1 ||

वसुदेवसुते काळि वासुदेवसहोदरि |
वसुंधरश्रिये नंदे दुर्गादेवि नमोऽस्तु ते || 2 ||

योगनिद्रे महानिद्रे योगमाये महेश्वरि |
योगसिद्धिकरी शुद्धे दुर्गादेवि नमोऽस्तु ते || 3 ||

शंखचक्रगदापाणे शार्ङ्गाद्यायुधबाहवे |
पीतांबरधरे धन्ये दुर्गादेवि नमोऽस्तु ते || 4 ||

ऋग्यजुः सामाथर्वाणश्चतुः सामंतलोकिनि |
ब्रह्मस्वरूपिणि ब्राह्मि दुर्गादेवि नमोऽस्तु ते || 5 ||

वृष्णीनां कुलसंभूते विष्णुनाथसहोदरि |
वृष्णिरूपधरे धन्ये दुर्गादेवि नमोऽस्तु ते || 6 ||

सर्वज्ञे सर्वगे शर्वे सर्वेशे सर्वसाक्षिणि |
सर्वामृतजटाभारे दुर्गादेवि नमोऽस्तु ते || 7 ||

अष्टबाहु महासत्त्वे अष्टमी नवमी प्रिये |
अट्टहासप्रिये भद्रे दुर्गादेवि नमोऽस्तु ते || 8 ||

दुर्गाष्टकमिदं पुण्यं भक्तितो यः पठेन्नरः |
सर्वकाममवाप्नोति दुर्गालोकं स गच्छति || 9 ||

इति श्री दुर्गाष्टकं |